क्रमते शुक्लपक्षादौ भास्करात्परमास्थितः ॥ आपूर्यंते परस्यांतः सततं दिवसक्रमात् ॥ ४ ॥ देवैः पीतं क्षये सोममाप्याययति नित्यशः॥ पीतं पञ्चदशाहं तु रश्मिनैकेन भास्करः ॥ ५ ॥आपूरयन् सुषुम्नेन भागंभागमनुक्रमात् ॥ इत्येषा सूर्यवीर्येण चंद्रस्याप्यायिता तनुः॥६॥ स पौर्णमास्यां दृश्येत शुक्लः संपूर्णमंडलः ॥ एवमाप्यायितं सोमं शुक्लपक्षे दिनक्रमात् ॥ ७ ॥ततो द्वितीयाप्रभृति बहुलस्य चतुर्दशीम्॥ पिबंत्यम्बुमयं देवा मधु सौम्यं सुधामृतम् ॥ ८ ॥ संभृतं त्वर्धमासेन ह्यमृतं सूर्यतेजसा ॥ पानार्थममृतं सोमं पौर्णमास्यामुपासते ॥ ९॥ एकरात्रिं सुराः सर्वे पितृभिस्त्वृषिभिः सह ॥ सोमस्य कृष्णपक्षादौ भास्कराभिमुखस्य च ॥ १०॥ प्रक्षीयंते परस्यांतः पीयमानाः कलाः क्रमात् ॥ त्रयस्त्रिंशच्छताश्चैव त्रयस्त्रिंशत्तथैव च ॥ ११ ॥ त्रयस्त्रिंशत्सहस्राणि देवाः सोमं पिबंति वै ॥ एवं दिनक्रमात्पीते विबुधैस्तु निशाकरे ॥ १२ ॥ पीत्वार्धमासं गच्छन्ति अमावास्यां सुरोत्तमाः ॥ पितरश्चोपतिष्ठंति अमावास्यां निशाकरम् ॥ १३ ॥ ततः पंचदशे भागे किंचिच्छिष्टे कलात्मके ॥ अपराह्णे पितृगणा जघन्यं पर्युपासते ॥ १४ ॥ पिबंति द्विकलं कालं शिष्टा तस्य कला तु या ॥ निस्सृतं तदमावास्यां गभस्तिभ्यः स्वधामृतम् ॥ १५ ॥ मासतृप्तिमवाप्याग्र्यां पीत्वा गच्छंति तेऽमृतम् ॥ पितृभिः पीयमानस्य पंचदश्यां कला तु या ॥ १६ ॥